१पतिम्वरायां कन्यायां अमरः। ४कन्यामात्रे च स्त्री।

**वर्वणा** स्त्री वरिति वणति शब्दायते वण–अच्। (भणभणे) मक्षिकाभेदे अमरः। अयमौष्ठ्यादिरित्यन्ये।

**वर्वर** न॰ वृ–अरच् वुट्च्। १चिकुले २पीतचन्दने ३गन्धरसे च राजनि॰। ४पामरे ५मूर्खे च त्रि॰। "पात्वमिच्छन्ति वर्वरा" इत्युद्भटः। ६केशभेदे (वावरी) ७देशभेदे कृष्णार्जके (कालवावुइ) वृक्षे च पु॰राजनि॰। ८मक्षिकाभेदे पुंस्त्री॰शब्दर॰(वावइ) १०वृक्षे स्त्री टाप् ङीप् वा"वर्वरी कवरी तुङ्गी खरपुष्पाजगन्धिका। पर्णासस्तत्र कृष्णे तु कठिञ्जरकुठेरकौ। कालमालः करालश्च मलूकः कृष्णमल्लिका। तत्र शुक्लोऽर्ज्जकः प्रोक्तो वटी-पत्रस्ततोऽपरः। वर्वरीत्रितयं रूक्षं शीतं कटु विदाहि च। तीक्ष्णं रुचिकरं हृद्यं दीपनं लघुपाकि च। पित्तलं कफवातास्रदद्रुकृमिविषापहम्" भावप्र॰। संज्ञायां कन्। वर्वरिका चन्दनभेदे पुष्पभेदे स्त्री मेदि॰।

**वर्वरीक** पु॰ वृ–ईकन् फर्फरीका॰ नि॰। १शाकभेदवृक्षे २कुटिलकेशे उणा॰। ३वनतुलसिकायां (वावुइतुलसी) शब्दच॰ ४महाकाले हेमच॰।

**वर्वा** स्त्री वृ-व तस्य नेत्त्वम्। (वावुइ) वृक्षभेदे शब्दच॰।

**वर्वुर** पु॰ वृ-उरच् वुट्च्। (वावला) वृक्षभेदे राजनि॰। ओष्ठ्यादिरित्यन्ये।

**वर्ष** पु॰ वृष–भावे घञ् कर्त्तरि अच् वा। १वृष्टौ २जम्बु-द्वीपांशभेदे पुंन॰ अमरः।

"लङ्कादेशाद्धिमगिरिरुदक्स्यैमकूटोऽथ तस्मात् तस्मादन्यो निषध इति ते सिन्धुपर्यन्तदैर्घ्याः। एवं सिद्धादुदगपि पुराच्छृङ्गवच्छुक्लनीला वर्षांणवेषां जगुरिह बुधा अन्तरे द्रोणिदेशान्। भारतवर्षमिदं हि उदगस्मात् किन्नरवर्षमतो हरिवर्षम्। सिद्धपुराच्च तथा कुरु तस्मादुदिवि हिरण्-मयरम्यकवर्षे। माल्यवांश्च यमकोटिपत्तनाद्रोमकाच्च किल गन्धमादनः। नीलशैलनिषधावधी च तावन्तरालमन-योरिलावृतम्। माल्यवज्जलधिमध्यवर्ति यत् तत् तु भद्रतुरगं जगुर्बुधाः। गन्धशैलजलराशिमध्यगं केतु-मालकमिलाकलाविदः। निषधनीलसुगन्धसुमाल्यकैरल-मिलावृतमावृतमाबभौ। अमरकेलिकुलायसमाकुलं रुचि-रकाञ्चनचित्रमहीतलम्" सि॰शि॰। "अत्र भूगोलस्यार्धमुत्तरं जम्बूद्वीपम्। तस्य चाराब्धेश्च सन्धिर्निरक्षदेशः। तत्र लङ्का रोमकं सिद्धपुरं यमकोटिरिति पुरचतुष्टयं भूप-रिधिचतुर्थांशान्तरे किल कथितम्। तेभ्यः पुरेभ्यो यथा टिशि मेरुः सौतरा। अतो लङ्काया उत्तरतो हिमवान् नाम गिरिः पूर्वापरसिन्धुपर्यन्तदैर्घ्योऽस्ति। तस्योत्तरे हेमकूटः। सोऽपि समुद्रपर्यन्तदैर्घ्यः। तथा तदुत्तरे निषधः। तेषामन्तरे द्रोणिदेशा वर्षसंज्ञाः। तत्रादौ भारतवर्षम्। तदुत्तरं किन्नरवर्षम्। ततो हरिवर्षमिति। एवं सिद्धपुरादुत्तरतः शृङ्गवान् नाम गिरिः। ततः शुक्लगिरिः। ततो नीलगिरिरिति। तेऽपि सिन्धु-पर्यन्तदैर्घ्याः। तेषामन्तरे च वर्षाणि। तत्रादौ कुरुवर्षम्। तदुत्तरे हिरण्मयम्। ततो रम्यकमिति। अथ यम-कोटेरुत्तरतो माल्यवान् नाम गिरिः। स तु निषधनी-लपर्यन्तदैर्घ्यः। तस्य जलधेश्च मध्ये भद्राश्वं वर्षम्। एवं रोमकादुत्तरतो गन्धमादनः। तस्य जलधेश्च मध्ये केतुमालवर्षम्। एवं निषधनीलमाल्यवद्गन्धमादनैरावृत-मिलावृतं नाम नवमं वर्षम्। सा स्वर्गभूमिः। अतस्तत्र देवक्रीडास्थानानि"। ३द्वादशमासात्मके काले ४जम्बुद्वीपे च पु॰मेदि॰। कर्त्तरि अच्। ५मेघे पु॰ हेमच॰ ६प्रभ-वादिषु षष्टिवत्सरेषु पु॰।

**वर्षकरी** स्त्री वर्षं तत्सूचनं करोति रवेण कृ–ट। झिल्लि-कायां हेमच॰। [१वर्षोपले।

**वर्षकेतु** पु॰वर्षस्य वृष्टेः केतुरिव। १रक्तपुनर्नवायाम् राजनि॰।

**वर्षकोष** पु॰ वर्षस्य कोष इव। १दैवज्ञे शब्दर॰। २मासे हेमच॰। [४वर्षणे संक्षिप्तसा॰।

**वर्षणि** स्त्री वृष–अनि। १कृतौ २वर्त्तने उणा॰। ३कृतौ

**वर्षपर्वत** पु॰ वर्षाणां चिह्नभूतः सीमाभूतो वा पर्वतः। "हिमवान् हेमकूटश्च निषधो मेरुरेव च। चैत्रः कर्णी च शृङ्गी च सप्तैते वर्षपर्वताः" इत्युक्तेषु पर्वतेषु हारा॰। द्वीपभेदेऽन्येऽपि वर्षपर्वता कुलपर्वतशब्दे २१२२ पृ॰ दर्शिताः। सि॰शि॰ उक्ता जम्बूद्वीपपर्वता वर्षशब्दे दर्शिताः। तत्र नाममात्रे भेदः कल्पभेदात्।

**वर्षपाकिन्** पु॰ वर्षेण पाकोऽस्त्यस्य इनि। आम्रातकवृक्षे हेमच॰ तस्य हि मुकुलोद्गमात् प्रायेण वत्सरानन्तर-फलपाकः। [राजनि॰।

**वर्षपुष्पा** स्त्री वर्षकाले पुष्पमस्याः। सहदेवीलतायाम्

**वर्षप्रिय** पुंस्त्री॰ वर्षः प्रियोऽस्य। चातकपक्षिणि त्रिका॰ स्त्रियां योपधत्वात् टाप्।

**वर्षवर** पु॰ वर्षं रेतोवर्षणं वृणोति आवृणोति वृ–अच्। "ये त्वन्तःपुरचारिणः प्रथममातीयाः स्त्रीस्वभाविनः। जात्या न दुष्टाः कार्येषु ते वै वर्षवराः स्मृताः" इत्युक्तलक्षणे